Title वैश्वदेवविधिः

Author

Extent ३ पत्राणि Age

Subject सूत्रपद्धतिः

वैश्वदेवविधिः

११८३

॥श्री॥ अद्य पूर्वोच्चरितएवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ॥ श्रुतिस्मृतिपुराणो
क्तफलप्राप्त्यर्थं आत्मसंस्कारार्थं अन्नसंस्कारार्थं पंचसूनादोषपरिहारार्थं प्रातःसा
यं वैश्वदेवाख्यं कर्म करिष्ये॥ जिह्वोदमूना अत्रेयो वसुश्रुतोग्निस्त्रिष्टुप्॥ एह्यग्ने रा
होगणो गोतमो वामदेवोग्निस्त्रिष्टुप्॥ अग्न्यावाहने विनियोगः॥ ॐ जुष्टो दमूना
अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान्॥ विश्वा अग्ने अभियुजो विहत्या शत्रु
यतामाभरा भोजनानि॥ एह्यग्न इह होता निषीदादब्धः सुपुरएता भवानः॥ अवतां
त्वा रोदसि विश्वमिन्वे यजा महे सौमनसाय देवान्॥ इत्यग्नेरावाहनम्॥ आ
च्छादनं दुरोहतत्य॥ समस्तव्याहृतीनां परमेष्ठि प्रजापतिः प्रजापतिर्बृहती॥ अग्नि
प्रतिष्ठापने विनियोगः॥ ॐ भूर्भुवस्स्वरोम्॥ रु मक नामाग्निं प्रतिष्ठापयामि॥
प्रोक्षितेधनानि निक्षिप्य॥ वेणुधवन्या प्रबोध्य ध्यायेदेवं॥ चत्वारिशृंगा गोतमो वा
मदेवोग्निस्त्रिष्टुप्॥ अग्निमूर्तिध्याने विनियोगः॥ ॐ चत्वारि शृंगा त्रयो अस्य

मेषारूढ जटा बद्ध गौरवर्णमहोजसं ।। धूम्रध्वजं लोहिताक्षं सप्तार्चिस्सर्वकामदं ।। ५ ।।

।। वैश्व ।। ।। १ ।। सप्तपादो द्विशीर्षस्सप्तहस्तोऽसौऽस्य ।। त्रिधा बद्धो वृषभो रोरवीति महो देवो
मर्त्यां आविवेश ।। सप्तहस्तश्चतुः शृंगः सप्तजिह्वो द्विशीर्षकः ।। त्रिपात्प्रसं
न्नवदनः सुखासीनः शुचिस्मितः ।। स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां
तथा ।। बिभ्रद्दक्षिणहस्ते तु शक्तिमन्नं स्रुचं स्रुवं ।। तोमरं व्यजनं वामे घृ
तपात्रं च धारयं ।। आत्माभिमुखमासीन एवं रूपं हुताशनः ।। अग्ने वैश्वा
नर शांडिल्य गोत्र मेषध्वज प्राङ्मुख मम संमुखो भव वरदो भव ।। परिस
मूहनं ।। परिस्तरणं ।। पर्युक्षणं ।। अग्नयेऽलंकरणं ।। विश्वानीनइत्यस्य प्रस्था
ने विनियोगः ।। ॐ विश्वानि नो दुर्गहा जातवेदः ।। सिंधुं न नावा दुरितातिप
र्षि ।। अग्ने अत्रिवन्नमसा गृणानो ऽस्माकं बोध्यविता तनूनां ।। यस्त्वा हृदा ।। देव ।। ।। २ ।।
कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि ।। जातवेदो यशोऽस्मासु धेहि प्र
जाभिरग्ने अमृतत्वमश्यां ।। यस्मै त्वं सुकृते जातवेद उलोकमग्ने कृण

स्योन॥ अश्विनं सपुत्रिणं वीरवंतं गोमंतं रयिं नश शते स्वस्ति॥ आत्मा ने चालं कृ
त्वा॥ हस्तं प्रक्षाल्य॥ चरुमभिघार्य॥ गात्रिमंत्रेण प्रोक्ष॥ उध स्त्या॥ पुनर्मुस्त्वा॥
अवदाय धर्मेण च कृवदाय॥ ॐ सूर्याय स्वाहा॥ सूर्याय इदं न मम॥ ॐ प्रजा
पतये स्वाहा॥ प्रजापतय इदं० ॐ अग्नये स्वाहा॥ अग्नय इदं० प्रजापतये स्वाहा॥
प्रजापतय इदं० ॐ सोमाय वनस्पतये स्वाहा॥ सोमाय वनस्पतय इदं० ॐ
अग्निषोमाभ्यां स्वाहा॥ अग्नीषोमाभ्यामिदं० ॐ इंद्राग्निभ्यां स्वाहा॥ इंद्रा
ग्निभ्यामिदं० ॐ द्यावापृथिवीभ्यां स्वाहा॥ द्यावापृथिवीभ्यामिदं० ॐ ध
न्वंतरये स्वाहा॥ धन्वंतरय इदं० ॐ इंद्राय स्वाहा॥ इंद्राय इदं० ॐ विश्वे
भ्यो देवेभ्यः स्वाहा॥ विश्वेभ्यो देवेभ्य इदं० ॐ ब्रह्मणे स्वाहा॥ ब्रह्मण इदं०
प्रदक्षिणमग्निं परिसिंचामि॥ ॐ भूः स्वाहा॥ अग्नय इदं०॥ ॐ भुवः स्वा
हा॥ वायव इदं० ॐ स्वः स्वाहा॥ सूर्याय इदं० ॐ भूर्भुवः स्वः स्वाहा॥ प्रजाप

॥ वैश्व ॥ त यद्द दं ॥ ॐ मानस्तोके तिकुत्सोरुद्रो जगती ॥ विभूतिग्रहणे विनि
॥ २ ॥ योगः ॥ ॐ मानस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु री
2 रिषः ॥ ॐ वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ ॐ
त्र्यायुषं जमदग्नेरिति ललाटे ॥ कश्यपस्य त्र्यायुषमिति कंठे ॥ अग
स्त्यस्य त्र्यायुषमिति नाभौ ॥ यद्देवानां त्र्यायुषमिति दक्षिणस्कंदे ॥ तन्नोऽअ
स्तु त्र्यायुषमिति वामस्कंदे ॥ त्वा तायुषं बलायुषमिति शिरसि ॥ ॐ चैमस्व
रेश्वमे यज्ञोपवीतेन मध्य ॥ यत्तेत्यू नेतस्मै तऽउप पन्तेऽअतिरिक्तं तस्मै ते
नमः ॥ अग्नये नमः ॥ ॐ स्वस्ति श्रद्धां मेधां य[illegible]शः प्रज्ञां विद्यां बुद्धिं श्रियं
बलेऽआयुष्यं तेजऽआरोग्यं देहि मे हव्यवाहनः ॥ श्रीं देहि मे हव्यवाहनो ॥ देव ॥
नमो नमः ॥ अनेन प्रातः सायं वैश्वदेवाख्येन कर्मणा ॥ भगवान् ॥ यज्ञरू ॥ २ ॥
पी परमेश्वरः प्रीयतां न मम ॥ विष्णवे नमः ॥ ॥ इति काकबलिं दद्यात् ॥

स्कंदं मासेपि वैन्ये घ तस्य ते द्विजातिभिः॥ सद्यो भवति पूतात्मा
रुद्राक्षधारि शिष्यते॥ २३ इति स्कंदपुराणे तत्रैव रुद्राक्षमहात्म्यं संपूर्ण
मिति॥

अथ रुद्राक्षमहात्म्यं वक्ष्यामि समासतः॥ सर्वपापक्षयकरं प
ठतां शृण्वतामपि॥ १॥ अभक्तो वापि भक्तो वा नीचो नीचतरोपि
वा॥ रुद्राक्षं धारयेद्यस्तु मुच्यते सर्वपातकैः॥ २॥ रुद्राक्षधा
रणं पुण्यं केन वा सदृशं भवेत्॥ महाव्रतमिदं प्राहुर मुनयस्त
त्वदर्शिनः॥ ३॥ सहस्रं धारयेद्यस्तु रुद्राक्षाणां धृतव्रतः॥ तं
नमंति सुराः सर्वे यथा रुद्रस्तथैव सः॥ ४॥ अभावे तु सहस्र
स्य बाह्वोः षोडश षोडश॥ एकं शिखायां करयोर्द्वादश द्वादशैव
तु॥ ५॥ द्वात्रिंशत्कंठदेशे तु चत्वारिंशच्च मस्तके॥ एकैकं कर्णयो
षट् षट् वक्षस्यष्टोत्तरं शतं॥ ६॥ यो धारयति रुद्राक्षान् रुद्रवत्सो
पि पूज्यते॥ मुक्ता प्रबाल स्फटिकै रौप्य वैदूर्य कंचनैः॥ ७॥ छ॥

स्वचांडालभूतपितीतवायसेभ्यो अन्नंभुमौ निक्षिपेत्॥ गोदोहनमात्रंतत्र
3 स्थित्वाऽ अतिथिमाकांक्षयेत्॥ हस्तौ पादौ प्रक्षाल्य॥ अचम्यगृहंप्रवेश
येत्॥ ॐ यमोसियमदूतोसि वायसोसिनमोस्तुते॥ अहोरात्रं कृतं पापंब
लिंभक्षंतुवायसा॥ ॐ शांता पृथिवी शिवमंतरिक्षं द्यौर्नो देव्यभयंनोऽ
अस्तु॥ शिवा दिशः प्रदिश ऽउद्दिशो नऽ आपो विद्युतः परिपांतु॥ सर्वतः
शांतिः शांतिः शांतिः॥ इति वैश्वदेव समाप्तः॥ हस्ताक्षर गंगाधर भट मा
तापूरकेर आत्मार्थं परोपकारार्थं स्वजनार्थं लिखितं समाप्तः॥ शिवरामप
तयासलेहुनदेत्ले॥ श्रीक्षेत्र अमरसेरकेबिच॥ कासि विश्वेश्वरार्पणम
स्तु॥ विकृति नाम संवत्सरे दक्षिणायने शरदृतु आश्विनमासे शुक्लप
क्षे तिथौ तु चेर्थीयां शुभतिथौ सौम्यवासरे तद्दिने माध्यानसमये समाप्तः॥ ध्॥